National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(4): 19-21
© 2016 NJHSR
www.sanskritarticle.com
Received: 22-02-2016
Accepted: 23-02-2016

**बृजभूषण शर्मा**
शोधच्छात्रः,( S.R.F.),
राजस्थान विश्वविद्यालयः
जयपुरम् (राजस्थानम्)

**Correspondence:**
**बृजभूषण शर्मा**
शोधच्छात्रः,( S.R.F.),
राजस्थान विश्वविद्यालयः
जयपुरम् (राजस्थानम्)

# कविरेकः कृती कालिदास एव महीयते

**बृजभूषण शर्मा**

को न जानाति चित्तानन्दजनिका हृदयाह्लादकारिणी सहृदयहृदयहारिणी पराशैलीलसिताकामिनी वहावभावकटाक्ष भुजाक्षेपप्रभृतिभिः समानसेव्यतया रसास्वादनसुखपरम्परायाः जनयित्री कालिदासस्य कवितेति। सेयं सरलया भावाभिव्यक्तिप्रक्रियया, भूयिष्ठ्यार्थगभीरतया, प्रेष्ठया पद्धत्या, श्रेष्ठया विवृतिसरण्या, साधिष्ठयहृयोगसाधनादीक्षया वरिष्ठया आत्मविशुद्धि-शिक्षया सर्वस्यापि लोकस्य आदृतिमनुभवति। कविताकामिनीविलासः कालिदासः तादृशः प्रगतिशीलो लोकभावाभिज्ञः सरसभावानुविद्धो मानवमनोविज्ञान विदग्धः कविरासीद् यो लौकिकभावमयं रस-भाव-भाषालंकारलंकृतं सर्वजनग्राह्यम् आभिज्ञानशाकुन्तलं – विक्रमोर्वशीय – मालविकाग्निमित्राख्यानि त्रीणि नाटकानि रघुवंश – कुमारसम्भवाख्ये द्वे महाकाव्ये मेघदूततुर्संहाराख्ये द्वे गीतिकाव्ये प्रणिनाय विजयतेतराम्।कवि जयदेवः प्रसन्नराघवनाटकप्रस्तावनायां भणति-

**यस्याश्चैरश्चिकुरनिकरो कर्णपूरो मयूरो,**
**भासो हासः कविकुलगुरूः कलिदासो विलासः।**
**हर्षो हर्षः हृदयवसतिः पंचबाणस्तु बाणः,**
**केषां नैषा कथय कविता - कामिनी कौतुकाय।।**

अयं महाकविः लौकिकानां दुःखं तथा निरूपयामास यथा तादृशं दुखं कालिदासेन पूर्वं कश्चिदनुभूतमस्ति अथवा वर्णनसमये स्वयं तद् दुःखमनुभवन्नस्तीति। एतदेव दृष्ट्वा तत्र भवन्तः समालोचकाः सङ्गिरन्ते-

**कविरेकः कृती कालिदास एव महीयते।**
**लोकेऽस्मिन् दुःखदग्धानां पीडां यो वेद तत्त्वतः।।**

अर्थात कविषु कालिदासः एव तादृशः कविः यः अस्मिन् लोके दुःखैःपीड़ितानां जनानां पीडाः सम्यक्तया यथार्थतया च ज्ञात्वा स्वसाहित्ये तासां पीडानां निरूपणं कृतवान्। नान्यः तादृशः कविः इति। अस्य विषयस्य समर्थनार्थं प्रमाणानि प्रस्तूयन्ते। लोकेऽस्मिन् नानाविधदुःखैः दग्धाः पीड़िताः दृश्यन्ते लौकिकाः। यथा - पितृदुःखं,पतिदुःखम्,प्रकृतिदुःख,स्त्रीदुःखं,विरहदुःखं,तपोदुःखं,लोकनिन्दया जायमानदुःखं, ऋतुजायमानदुःखम् इत्यादि। एतानिसर्वाणि दुःखानि कालिदासेन स्वीयकाव्ये सरलतया सरसतया सम्यक्तया यथार्थतया च निबद्धानि। तत्र प्रप्रथमतया अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के पितृदुःखम्। यथा कण्वः शकुन्तला पतिगृहं गच्छतीत्यस्मिन्' विषये चिन्तयति तदानीन्तनभावमित्थं वर्णयति कविः

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,**
**कण्ठस्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**
**वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः,**
**पीड्यन्ते गृहिणः कथं नु तनया विश्लेषदुःखैर्नवैः।।**

अर्थात् कण्वस्य हृदयं 'शकुन्तला अद्य गमिष्यतीति' चिन्तनेन आकृन्तं जातमस्ति, कण्ठ अवरूद्ध जातः। शकुन्तलायाः विषये चिन्तनकारणेन दृष्टिरपि जडा जाताऽस्ति। तथैव पतिवियोगपीडितायाः रतेः इत्थं वर्णनं करोति कविः कालिदासः-

**अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता।**
**विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम्।।**
**अवधान परे चकार सा प्रलयान्तोन्मिषते विलोचने।**
**न विवेद तयोरतृप्तयोः प्रियमत्यन्तविलुप्तदर्शनम्।।** (कुमार., 4-1,2)

स्वपतिं कामदेवं भस्मभूतं दृष्टवा कामस्य पत्नी रतिः करूणक्रन्दनं चकार। एवमेव यक्षस्य वियोगदुःखमपि दर्शनीयम्

**कश्चित्कान्ता विरहगुरूणा स्वाधिकारात्प्रमत्तः**

**शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः**
**यक्षश्चक्रे जनकतनया स्नानपुण्योदकेषु**
**स्निग्धच्छायातरूषु वसतिं रामगिर्याश्रमेषु।।** (मेघ. पूर्वमेघ - 1)

अजविलापमप्यतीव मार्मिकं प्रतिभाति। रघुवंशे इन्दुमतीनिधन - विषण्णस्य राज्ञोऽजस्य वर्णनं समस्यापि सचेतसः करूणाद्रवत्वं संचारयति। तद्यथा -

**पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया।**
**समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः।।**
**विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम्।**
**अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु।।** (रघु. 8-42, 43)

काश्चनाप्सरसः पूर्वजन्मनः शापवशात् इन्दुमतिरूपेण प्रथिव्यामवतीर्णा आसीत् देवर्षेः वीणाया मालाया स्पर्श मात्रेणैव सा मनुष्ययोनेः मुक्ता सत्यप्सरसो बभूव जगाम च देवलोकम्। इन्दुमत्याः मृतिं दृष्ट्वा महाराजः अजः करूणं विललाप। पत्नीविरहदुःखेन पीड़ितस्य अजस्य वर्णनं कृतं कालिदासेन। एवमेव तपसा पार्वत्यानुभूयमानं दुखं कालिदासः बहुसरलैः शब्दैः कुमारसम्भवे वर्णयति।
यथा -

**प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभारयाम्।**
**अकारि तत्पूर्वनिबद्धया तया सरागमस्या रसनागुणास्पदम्।।** (कुमार. 5-10)

पुत्र वियोगे पित्रोः दुःखमेवं वर्णयति कवि स्वीयरघुवंशमहाकाव्यस्य नवमसर्गे-

**तौ दंपती बहु विलप्य शिशोः प्रहत्रा शल्यं निखातमुदहारयतामुरस्तः।**
**सोऽभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः।।** (रघु. 9-78)

स्ववंशपरम्परानुसारेण दशरथः अयोध्यायाः शासनं चकार। एकदासः आखेटेन विहर्तुमरण्ये जगाम। रात्रौ कस्मिंश्चित् सरसि घटेन जलाहरणं कुर्वतः कस्यचन मुनिकुमारस्य घटेन जलाहरणशब्दं श्रुत्वा शब्दवेधिना बाणेन तस्योपरि प्रहारं चकार तं वनीयं दन्तिनं मत्वा। बाणेन विद्धो मुनिकुमारः हा पितः तात। इति शब्दं कृत्वा भूमौ निपपात। तदा तं मनुष्यं ज्ञात्वा राजा दशरथ तस्य मुनिकुमारस्य सविधे जगाम। सः मुनि-कुमारः प्रावोचत् यत् तस्य नाम श्रवणकुमारो वर्तते। तस्य मातापितरावन्धौ स्तः। तीर्थाटन प्रसङ्गेन ताभ्यां साकमत्र सविधे तिष्ठन् सः तयोः तृषितयोः तृषोपशमनाय तत्र जलाहर्तुमागत आसीत्। एतावदेवोक्त्वा श्रवणकुमारः मृतिं जगाम। ततः अन्धयोस्तापसयोः कृते जलमादाय तयोः सविधे यदा आजगाम राजा दशरथः तदा राजानं तं स्वपुत्रहन्तारं ज्ञात्वा तापसौ तौ राज्ञे पुत्रविप्रयोगे एव प्राणानां परित्यागाय शापं ददतुः। एवमेव पुत्रवियोगे पितृदुःखम्-दशरथः रामं युवराजं चिकीर्षति। किन्तु मन्थरायाः मन्त्रणां मत्वा कैकयी रामाय चतुर्दशवर्षाणां वनवासमेवञ्च स्वपुत्राय भरताय युवराजपदं दशरथस्य सविधे वरदानरूपेण ययाचे। पितुः आज्ञया रामः सीतालक्ष्मणाभयां सह वनं जगाम। पुत्रस्य वियोगे दशरथः प्राणान् तत्याज। वर्णितं यथा-

**तस्याभिकेषसंभारं कल्पितं क्रूरनिश्चया।**
**दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः।।**
**राजाऽपितद्वियोगार्तः स्मृत्वा शापं स्वकर्मजम्।**
**शरीरत्यागमात्रेण शुद्धिलाभममन्यत।।** (रघु. 12-4, 10)

भ्रातृदुःखमपि कविना इत्थं वर्णितम्-

**ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणम्।**
**रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः शुचा।।** (रघु. 12-77)

लोकनिन्दया जायमानं दुःखम्-

**कलत्रनिन्दागुरूणा किलैवमभ्याहतं कीर्तिविपर्ययेण।**
**अयोघनेनास्य इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्रे।।** (रघु. 14.33)

अत्र 'अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः' इति भद्रस्य वचनं श्रत्वा रामस्य हृदयं विदीर्णं जातं, तस्य वर्णनं कविः करोति अनेन श्लोकेन। न केवलं मानवजातेः एव दुःखं कालिदासः वर्णितवान् अपितु प्रकृतेः यथा वृक्ष - लतामृगमयूरादीनां वर्णनं चकार। यदा शकुन्तला पतिगृहं गच्छन्ती आसीत् तदानीं मृगाणां मयूराणां लतानाञ्च वियोगदुःखेन एतादृशी स्थितिर्जाता इति वर्णयति कविर्यथा-

**उद्गलितदर्भकवला मृग्यः परित्यक्तानर्तना मयूराः।**
**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।।** (शाकु. 4.12)

एवमेव सीता-शोक-सहानुभूतिपराः पशुपक्षिणोऽपि भक्ष्यादित्यागेन स्वसमवेदनां प्रकटयन्ति।

**नृत्यं मयूराः कुसुमानि भृङ्गा दर्भानुपात्तान् विजहुर्हरिण्यः।**

**तस्याः प्रयन्ने समदुःखभावमत्यन्तमासीद् रूदितं वनेऽपि।।** (रघु.14.69)

यदा लक्ष्मणेन द्वारा श्रीरामः सीतां महर्षेः वाल्मीकेः आश्रमस्य सविधे व्यसृजत्। एकाकिनीं सीतां वने विसृज्य अयोध्यां प्रत्यागच्छन्तं लक्ष्मणं दृष्ट्वा सीता भृशं रूरोद। सीतायाः दुःखे दुःखितैः मयूरैः नर्तनं परित्यक्तं। वृक्षाः पुष्पाणि परित्यजन्तः आसन् यथा ते रूदन्तः अश्रूणि मुञ्चमानाः स्युः। मृग्यः

**उद्गलितदर्भकवलाः आसन्। एवं प्रकारेण कालिदासेन प्रकृतिदुःखं वर्णितम्।**

कविकुलललामभूतः कविताकामिनीकान्तः महाकविकालिदासः कस्य सचेतसः चेतः न आह्लादयति। तथ्यनिरूपणप्रवणा हार्दिकभावोज्ज्वला कविता कामिनी - स्वरूपनिरूपणपराः कालिदास-कृतयः कविताकामिन्याः विलासत्वेन गण्यन्ते। शाकुन्तले पितृदुःखं प्रकृतिदुःखं, रघुवंशे पितृ-मातृ-प्रकृतिदुःखं लोकनिन्दाजायमानं दुःखं, कुमारसम्भवे पतिदुःखं मेघदूते प्रेयसीविरहवेदना इत्यादयः बहवो विषया ऐतिहासिकदृष्ट्या विसंवादग्रस्ताः सन्तोऽपि ‘कविर्मनीषी परिभूः स्वयम्भूः’ वचनमनुसृत्य स्वयम्भुवसार्वभौमस्य महाकवेः कालिदासस्य लेखन्या विश्वजनीनं प्रभावं प्रत्यक्षं निदर्शयन्ति। अत एव खलु समालोचकाः सङ्गिरन्ते-

**कविरेक कृती कालिदास एव महीयते।**
**लोकेऽस्मिन् दुःखदग्धानां पीडां यो वेद तत्त्वतः।।**

**संदर्भ ग्रन्थ सूची**


| | ग्रन्थ नाम | लेखक / सम्पादक | प्रकाशन |
|---|---|---|---|
| 1. | अभिज्ञानशाकुन्तलम् | कालिदासः | चैखम्भाप्रकाशन वाराणसी |
| 2. | काव्यप्रकाशः | मम्मटाचार्यः | चैखम्भाप्रकाशन वाराणसी |
| 3. | कालिदासग्रन्थावली | पं. सीताराम चतुर्वेदी | उ.प्र. संस्कृत संस्थान |
| 4. | कालिदासग्रन्थावली | रामचन्द्र मिश्रः | चैखम्भासुरभारती प्रकाशन, वाराणसी |
| 5. | कुमारसम्भवम् | कालिदासः | चैखम्भाप्रकाशन वाराणसी |
| 6. | नीतिशतकम् | भर्त्तृहरिः | चैखम्भाविद्याभवन, वाराणसी |
| 7. | मेघदूतम् | कालिदासः | चैखम्भाप्रकाशन वाराणसी |
| 8. | रघुवंशमहाकाव्यम् | कालिदासः | चैखम्भा-प्रकाशनकृष्णदास अकादमी वाराणसी |
| 9. | शिशुपालवधम् | माघः | चैखम्भा वाराणसी |
| 10. | संस्कतनिबन्धशतकम् | डॉ. कपिलदेव द्विवेदी | विश्वविद्यालय प्रकाशन वाराणसी |
| 11. | संस्कृत वाङ्मय का वृहद् इतिहास | बलदेव उपाध्याय | उ.प्र. संस्कृत संस्थान |
| 12. | संस्कृत साहित्य का इतिहास | आचार्य रामचन्द्र मिश्रः | चैखम्भामहाविद्याभवन वाराणसी |
| 13. | संस्कृत साहित्य का इतिहास | डॉ. उमाशंकर ऋषि | चैखम्भा विश्वभारतीय वाराणसी |
| 14. | संस्कृत प्रभा | डॉ. कपिलदेव द्विवेदी | उ.प्र. संस्कृत संस्थान |